पक्षेऽनेकत्र शक्तिः, अन्वयेऽर्थे च NayaVi. 275.10 (*on* i.1.25); NyāyRaMā. 96.22; कथञ्चिच्छक्तिद्वयकल्पनेऽप्यभिहितान्वयवादादन्विताभिधानपक्ष एव श्रेयान् TantrRaha. 33.14; अन्विताभिधानपक्ष एव पदान्तरापेक्षा स्यादिति भावः YuktiSneha. 154.30 (*on* i.1.7); अन्विताभिधानपक्षे तेषामपि वाचकत्वात् Nyāyāmṛ. 536A.8 (*on* 2.13); AdvaiSi. 784.16; ननु विशिष्टबोधे शुद्धविशेष्यभानानभ्युपगमपक्षे कथमन्विताभिधानपक्षाश्रयणम् LaCandr. 704.38.

**अन्विताभिधानपरिकल्पन** (anvitābhidhāna-parikalpana) *n.* assumption of reference to the semantically related (meanings) एकवाक्यता स्वभावसिद्धान्वयबोधनसामर्थ्यैस्तन्नियमायापेक्षितुं क्षम्यत इति कृतमन्विताभिधानपरिकल्पनव्यसनेन NyāyRaMā. 84.24.

**अन्विताभिधानपर्यवसान** (anvitābhidhāna-paryavasāna) *n.* culmination into reference to the semantically related (meanings) इह तु विषयेण कार्यस्यान्विताभिधानपर्यवसानादनध्याहारे प्राप्ते उच्यते VedāntKa. 69.14; 'द्वारम्' इत्यादावेकपदप्रयोगे प्रतिसम्बन्ध्यनुपादानेनान्विताभिधानपर्यवसानात्प्रतियोगिजिज्ञासायां संव्रियतामित्यनेनान्विताभिधानम् TantrRaha. 30.6.

**अन्विताभिधानप्रसङ्ग** (anvitābhidhāna-prasaṅga) *m.* undesired occasion of reference to the semantically related (meanings) पदार्थेष्वन्वये चास्ति पदानां शक्तिः। तदा पदार्थानन्वयं च युगपत्प्रतिपादयन्ति। ... उत क्रमेण। नाद्यः। अन्विताभिधानप्रसङ्गात् NyāySu. (Ja.) 89B.13 (*on* i.1.1)

**अन्विताभिधानबल** (anvitābhidhāna-bala) *n.* strength of reference to semantically related (meanings) लोके त्वनुमानत एव वक्तृज्ञानोपसर्जनतया संसर्गस्य सिद्धेरन्विताभिधानबलायातेऽपि प्रतिपादकत्वेऽनुवादकतामात्रं वाक्यस्येति निर्णीतवन्तः NyāyKuA. ii (1).212.4; [Abl.] on the strength of reference to semantically related (meanings) वेदान्तिनां प्राभाकराणां चान्विताभिधानबलात् सङ्केतग्रहः SarvaDaKau. 69.14.

**अन्विताभिधानभङ्गप्रसङ्ग** (anvitābhidhānabhaṅga-prasaṅga) *m.* undesired occasion of loss of reference to semantically related (meanings) किं जातिवाचकपदेन व्यक्तेरिव लक्ष्यत्वमर्थान्तरतदन्वययोरुत वाच्यत्वम्। नाद्यः। पदानामन्विताभिधानभङ्गप्रसङ्गात् TattvPradī. (Ci.) 151.5; अस्य शब्दस्यायमर्थ इति व्युत्पत्तिश्चेत् अन्विताभिधानभङ्गप्रसङ्ग इति चेन्न प्रातिस्विकव्युत्पत्तेः समुदायज्ञानार्थत्वात् ŚrutaPra. iB.89.17 (*on* i.1.1)

**अन्विताभिधानमत** (anvitābhidhāna-mata) *n.* theory of reference to the semantically related (meanings) अभिहितान्वयवादिमते संसर्गम्, अन्विताभिधानमते विशिष्टं बोधयति SarvaDaKau. 118.8; अन्विताभिधानमतमनूद्य प्रतिक्षिपति YuktiSneha. 153.34 (*on* i.1.7); प्राभाकरैश्च स्वीकृतान्विताभिधानमते अभिहितान्वयपक्षेऽपि जातिविशिष्टायां व्यक्तौ शक्तिः Nyāyāmṛ. 444.6 (*on* 2.2); अन्विताभिधानमते विभक्त्यन्तैकपदस्य शाब्दप्रमाजनकत्वस्वीकारेऽपि मतान्तरे तत्स्वीकारात् LaCandr. 378.31; 665.12; प्रभाकरं प्रति मणिकारस्यान्विताभिधानमतपरिच्छिन्दिन उक्तिः LaCandr. 673.29; 704.34; सकलपदान्तरपूर्तावितरपदार्थैः समन्वितः स्वार्थम्। सर्वपदानि वदन्तीत्यन्येषामन्विताभिधानमतम् MānaMe. 95.5.

**अन्विताभिधानरूप** (anvitābhidhāna-rūpa) *adj.* of the form of reference to semantically related (meanings) अन्विताभिधानरूपैकदेशिमतमपि न युक्तिसहम् AdvaiSi. 687.5; आकाङ्क्षादिभिर्यादृशानुभवो जायते तज्जननानुकूलायाः शक्तेः पदनिष्ठाया अन्विताभिधानरूपत्वात् LaCandr. 705.19.

**अन्विताभिधानलभ्य** (anvitābhidhāna-labhya) *adj.* to be obtained or known from reference to semantically related (meanings) क्रियाकार्यत्वस्यान्विताभिधानलभ्यत्वात्तथा च धर्मिणि वेदे शक्तिः कल्पनीया TattvCin. iv(2).349.8.

**अन्विताभिधानवाद** (anvitābhidhāna-vāda) *m.* (Prābhākaras') doctrine of reference to the semantically related (meanings) आनयेति पदम् ... अनन्विताभिधायि प्राप्तं यथा चेदमनन्वितार्थं तथा पदान्तरमपि स्यादिति दत्तजलाञ्जलीरन्विताभिधानवादः NyāyKa. 232.15; अन्विताभिधानवादेऽपि हि पदैः पदार्थेष्ववगतेषु पश्चाद्वाक्यार्थज्ञानं जायतेऽन्यथा सन्निधेर्दुर्लभत्वात् NyāyRaMā. 85.6; निरस्तश्चायमन्विताभिधानवादो न्यायरत्नमालायामित्यास्तां तावत् ŚāstrDī. 155.16 (*on* i.1.7); अन्विताभिधानवादेऽपि विधेरपि सिद्धं व्यङ्ग्यत्वम् KāvyPra. 230.1; अयं प्रत्येकपदव्युत्पादनप्रयासोऽन्विताभिधानवादप्रतिभटः NyāyKu. 4.12; अन्विताभिधानवादे तु केवलपदस्यावाचकत्वात् ŚatDū. 82.7; 'साभासज्ञानवाची यदि भवति पुनर्ब्रह्मशब्दस्तथाहंशब्दोऽहंकारवाची भवति तु जहती लक्षणा तत्र पक्ष' इति। अस्मिन् पक्षे अन्विताभिधानवादानभ्युपगमान्न दोषः AdvaiSi. 704.10; शब्दज्ञानं वाक्यार्थधीजनकमित्यन्विताभिधानवादस्य तद्भूताधिकरणीयभाष्ये दूषितत्वेन तत्परतया भाष्यव्याख्यानस्यानौचित्यात् LaCandr. 516.29.

**अन्विताभिधानवादिन्** (anvitābhidhāna-vādin) *m.* propounder of the doctrine of reference to the semantically related (meanings) अन्विताभिधानवादिन एष दोषः TātpaṬ. (U.) 61.20 (*on* 2.62); नन्वन्विताभिधानवादिनां कथं वाक्यार्थप्रतिपत्तिः PrakaPañ. 402.16; योऽप्यन्विताभिधानवादी 'यत्परः शब्दः स शब्दार्थः' इति हृदये गृहीत्वा Loc. 18.17 (1.4); योग्यत्वाभावादन्विताभिधानवादिनां तु अन्वितस्यानभिधानात्तत्राप्यन्वयः प्राप्नोति NyāyMañ. i.365.28; अन्विताभिधानवादी हि भवान् NyāyMañ. i.368.20; अन्विताभिधानवादिनस्तु प्रथमावगतानां पदानामभिधायकानाम् ... स्वार्थाभिधानसामर्थ्यम् TattvBi. 111.3; 123.9; वाच्य एव वाच्यार्थ इत्यन्विताभिधानवादिनः KāvyPra. 27.1; पदार्थान्तरमात्रेणान्वितः पदार्थः संकेतगोचरः तथापि सामान्यावच्छादितो विशेषरूप एवासौ प्रतिपद्यते व्यतिषक्तानां पदार्थानां तथाभूतत्वादित्यन्विताभिधानवादिनः KāvyPra. 223.3; अन्विताभिधानवादिनस्तु पदानां योग्येतरान्वितस्वार्थाभिधानसामर्थ्यमेकमेव कल्पनीयमिति कल्पना लाघवमित्ययमेव पक्षः श्रेयानिति TattvPradī. (Ci.) 149.3; अन्विताभिधानवादिभिरिहाप्यभिधानं विधेयम् Ekāva. 1.13(110) i.(41.2); अन्विताभिधानवादिनां प्रभाकरगुरूणां सिद्धान्त इति सर्वमवदातम् SarvaDaSaṁ. 12.290; अन्विताभिधानवादिना प्राभाकरेण भाट्टवद्विरलपदार्थव्युत्पत्त्यनङ्गीकारात् VivaPraSaṁ. 330.4; क्रियामात्रलक्षकत्वेन प्रवृत्ताप्यानयनपदैकवाक्यतयानयनमेव लक्षयतीत्यर्थः। अन्विताभिधानवादिनाप्येतदङ्गीकृतमित्याह YuktiSneha 155.21 (*on* i.1.7); अन्विताभिधानवादिमते शक्त्याभिहितान्वयवादिमते च लक्षणया ... अतिव्याप्तिः स्यात्तद्वारणाय उक्तम् AdvaiSi.665.1; न हि शाब्दबोधीयविशेष्यता केनाप्यनवच्छिन्ना स्वीक्रियते। अन्विताभिधानवादिनस्तु नेदं क्षमन्ते LaCandr. 671.42; अन्विताभिधानवादिनस्तु पदार्थसंसर्गस्यापि वाच्यतां स्वीकुर्वन्ति ŚaktiVā. 31.4.

**अन्विताभिधानवृत्ति** (anvitābhidhāna-vṛtti) *f.* type of denotation of the semantically related (meanings) सर्वा अपि वृत्तयोऽन्विताभिधानवृत्त्यन्तर्भूताः NyāyPari. 369.5.

**अन्विताभिधानव्यतिरेक** (anvitābhidhāna-vyatireka) *m.* absence of reference to the semantically related (meanings) सति आकाङ्क्षादौ कार्यव्यतिरेकदर्शनादन्विताभिधानव्यतिरेको न क्वाप्यस्ति TattvCin. iv (2). 468.2.

**अन्विताभिधानव्युत्पत्ति** (anvitābhidhāna-vyutpatti) *f.* knowledge of reference to the semantically related (meanings) सा च न शब्दनिबन्धनैव केवलमन्विताभिधानव्युत्पत्तावुपलक्षणम्, अध्याहृतेनापि लोके अन्विताभिधानदर्शनात् PrakaPañ. 389.7; अन्वितविशेषे च स्मृतिरिति नान्विताभिधानव्युत्पत्तिः स्यात् NayaVi. 54.7 (*on* i.1.2); अथ सिद्धपरे वाक्यान्तरे अन्विताभिधानव्युत्पत्तिः NyāyKu. 4.22.

**अन्विताभिधानशक्ति** (anvitābhidhāna-śakti) *f.* power of denotation of the semantically related (meanings) यद्यभिहितेनैवान्वितस्वार्थबोधनाभ्युपगम एव प्रतिनियतान्वयबोधो घटते, नान्यथा, तर्हि कल्प्यतां पदानामन्विताभिधानशक्तिरपि PrakaPañ. 410.2; सकलपदगोचरस्य स्मरणस्य पदेष्वन्विताभिधानशक्त्याधानशक्तिश्चेति शक्तित्रयकल्पनान्विताभिधानवादेऽपि तुल्या TattvPradī. (Ci.) 151.8.

**अन्विताभिधानसंभव** (anvitābhidhāna-sambhava) *m.* possibility of reference to the semantically related (meanings) ततश्च अभिक्रमणस्यापि शेषिभूतकर्त्रान्विताभिधानसंभवात् ... संनिहितप्रयाजकर्त्रैवान्विताभिधानं स्यात् MayūMāli. 202.22 (*on* iii.1.11)

**अन्विताभिधानसामर्थ्य** (anvitābhidhāna-sāmarthya) *n.* capacity or competency for reference to the semantically related (meanings) यद्यपि तदुक्तानां पदानामन्विताभिधानसामर्थ्यमस्ति, तथाप्यनन्वितार्थत्वशङ्कया नान्वयो निश्चीयते PrakaPañ. 243.15; अधिकारी ... क्वचिदश्रुतोऽप्यन्विताभिधानसामर्थ्यबलेन कल्प्यो, विश्वजिदादिषु ManuBh. i.201.21 (*on* 3.9); प्रकृतिप्रत्यययोरप्यन्विताभिधानसामर्थ्यं सूचितम् NyāySu. (Ja.) 86A.9 (*on* i.1.1); अन्विताभिधानसामर्थ्यात् ... पदानामपि विशिष्टार्थाभिधायित्वं सिद्धम् NyāyPari. 372.6.

**अन्विताभिधानसिद्धान्त** (anvitābhidhāna-siddhānta) *m.* conclusive view of reference to the semantically related (meanings) यत्प्रत्येकपदव्युत्पत्त्यभिधानं तदन्विताभिधानसिद्धान्तासंगताभिधानमिति NyāyKu. 5.2.

**अन्विताभिधानसिद्धि** (anvitābhidhāna-siddhi) *f.* establishment of the reference to the semantically related (meanings) अन्विताभिधानसिद्धेराकाङ्क्षोपशान्तेः PrakaPañ. 409.10; 484.18; उपव्ययत इत्येकपदश्रवणादन्विताभिधानसिद्ध्यर्थमर्थान्तरापेक्षायां सन्निहिताभिः सामिधेनीभिरन्विताभिधानं भवति NyāyRaMā. 134.26; 135.7; एकं पदमन्विताभिधानाय कर्तारमपेक्षमाणं संनिहितेन कर्त्रान्वीयत इति। तदयुक्तम्। प्रत्ययेनापूर्वेण धातोरन्विताभिधानसिद्धेः ŚāstrDī. 202.8 (*on* ii.1.11); ननु वाक्येऽन्विताभिधानसिद्धिः NyāyKu. 4.19; नास्ति प्रत्ययार्थेन प्रकृते-रन्विताभिधानसिद्धेरिति दूषयति MayūMāli. 202.10 (*on* iii.1.11).

**अन्विताभिधानाङ्गीकार** (anvitābhidhānāṅgīkāra) *m.* admittance of reference to the semantically related (meanings) वाक्यस्यान्वयलक्षकता तु न संमता। अन्विताभिधानाङ्गीकारात् Nyāyāmṛ. 463B.7.